श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

## श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ निर्वेदस्तबकः चतुर्विंशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ निर्वेदस्तबकः चतुर्विंशः ॥

शरणीकरणीयाङ्घ्रिं शश्वत्तापत्रयातुरैः।
सर्वनिर्वेदशमनीं समस्तजननीं नुमः ॥ **24.1** ॥

अनुपासित तावकाङ्घ्रि पद्मा -
    न्यपरामृष्ट परावरस्थितीनि।
जगदम्ब वृथैव जीर्यतो मे
    समतीतानि हि जन्मनां शतानि ॥ **24.2** ॥

अपवर्गकथापथातिगानाम्
    अनुदासीनहृषीककिङ्कराणाम्।
दिवसा बहवो वृथैव याताः
    तव सानन्दमुपासनं विना नः ॥ **24.3** ॥

अवधीरित साधुसङ्गमानाम्
    अपचारेषु च बद्धकङ्कणानाम्।
कथमन्यतमं कृपानिधे मां
    कमले हन्त वृथा कृथाः खलानाम् ॥ **24.4** ॥

स्मारं स्मारं मलिनविषयान् मानसं मेऽवसन्नं
    चारं चारं प्रतिखलगृहं जातखेदौ च पादौ।
कारं कारं कुजनविनुतिं क्लेशिता हन्त जिह्वा
    वारं वारं वरजलनिधे किं नु विज्ञापयेयम् ॥ **24.5** ॥

विहितमखिलं त्यक्त्वा कृत्वा च गर्हितमन्वहं
    तदुचितफलान्यत्रामुत्राप्यहो कलयन्नहम्।
गुणगणनिधे मृत्वा मृत्वा कियन्ति युगानि वा
    मुरविजयिनो जाये जायेयमस्मि भयातुरः॥ **24.6**॥

तृणत्याजं त्यक्त्वा त्रिजगति कलत्रादिविषयान्
    प्रणत्या ते दिव्याः कति कति गतिं यान्ति कृतिनः।
अहं त्वेवं तावद्विषयविषयन्त्रेषु पतितः
    विषीदन् संसारे विपदवसरे रोदिमि रमे॥ **24.7**॥

जननि महति वंशे जन्म लब्धं ततः किं
    विशदमधिगते वा वेदशास्त्रे ततः किम्।
सदसि कथकदर्पः सादितो वा ततः किं
    भवजलधितरिस्त्वं भाविता चेन्न चित्ते॥ **24.8**॥

अटित्वा दुर्देशान् सदसि च नटित्वा क्षितिभुजां
    पठित्वा दीनोक्तीरपि फलमलब्ध्वाऽतिचपलः।
अपारैर्व्यापारैरलसतनुराराधनमहो
    भवत्या हित्वाऽहं बलवदवसीदामि कमले॥ **24.9**॥

निरन्तरमरुन्तुदैर्निरयवेदनापादनाद्
    दुरासदधराभुजामलमपावनैः सेवनैः।
रमे ननु रमेत मे दुरितमोचके मेचके
    घनस्तनि मनस्त्वया घटितनर्मणि ब्रह्मणि॥ **24.10**॥

जनित हृदवसादं शुष्कनिर्वेदवादं
    जननि जहदपार्थं शश्वदालम्ब्य धैर्यम्।
शरणमिह भजेयं संश्रितान्यैरजेयं
    दनुजभिदमुदारं तं भवत्या सदारम्॥ **24.11**॥

निर्विण्णमब्धिकन्ये
    निरीक्ष्य मां शीतलैरपाङ्गलवैः।
अभिषिञ्चसि बलिवञ्चक
    चरणद्वय शरण वरणसाम्राज्ये ॥ **24.12** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे निर्वेदस्तबकः चतुर्विंशः ॥